**अनुद्वेग** *a.* Free from anxiety or apprehension. **-गः** Security or freedom from fear. अदैन्यमनुदीर्णत्वमनुद्वेगो व्यवस्थितिः Mb. 12. 274. 18.

**अनुधाव्** 1 P. 1 To run after; follow; ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति U. 1. 10 the sense follows the words (the words being not uttered with a view to a particular sense); स्वरुचिं निश्चयतोऽनुधावति Śi. 16. 44 follows his own will. -2 To run up to, approach. -3 To cleanse, wash.

**अनुधावनम्** 1 Going or running after, following, pursuing; तुरग °कण्डितसन्धेः Ś. 2. -2 Close pursuit of an object (for the knowledge of truth); research, investigation. -3 Seeking a mistress, though unattainable. -4 Cleansing, purification.

**अनुधूपित** *a.* Puffed up, proud, ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि Rv. 2. 30. 10.

**अनुध्यै** 1 P. 1 To think of, muse, consider attentively. -2 To wish well of, to bless, favour; प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति R. 14. 60 bless; अनुदध्युरनुध्येयं सांनिध्यैः प्रतिमागतैः 17. 36 favoured.

**अनुध्या** [ध्यै-अङ्] 1 Thinking or wishing well of, favouring, attachment. यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम् Bhāg. 1. 2. 15. -2 Sorrow; प्रेतो यन्तु व्याधः प्रानुध्याः Av. 7. 114. 2.

**अनुध्यान** *p. p.* Mused, thought of &c. **-तम्, -नम्** [ध्यै-ल्युट्] 1 Thought; अनुध्यानानन्तरमेव K. 262; meditation, religious contemplation. -2 Thinking of, remembrance; या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसम्भवा Ku. 6. 21. -3 Wishing well of, affectionate solicitude for; अनुध्यानैरुपेतव्यं वत्सयोर्भद्रमस्तु वः (v. l. अनुध्यातै) U. 7. 11; सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरां भव U. 1.

**अनुध्यायः** [ध्यै कर्तरि घञ्] One who wishes well of.

**अनुध्येय** *a.* To be favoured or wished well of; अनुदध्युरनुध्येयम् R. 17. 36.

**अनुनद्** 1 P. To sound towards or at (with acc.). *-Caus.* To cause to sound, make resonant, fill with echo; पृथिवीं चान्तरिक्षं च सागरांश्चानुनादयन्; साधु साध्विति नादेन पृथिवीमन्वनादयन्; विहङ्गैरनुनादितम् Mb. made musical or resonant.

**अनुनादः** [अनुरूपो नादः] Sound, noise; गुरुतरकलनूपुरानुनादम् Śi. 7. 18; reverberation, echo.

**अनुनादिन्** *a.* Echoing, sounding, resonant. तस्यास्फोटितशब्देन महता चानुनादिना। पेतुर्विहङ्गा गगनादुच्चैश्चेदमघोषयन् ॥ Rām. 5. 42. 32.

**अनुनन्द्** 1 P. To enjoy.

**अनुनय, -नायिका** See under अनुनी.

**अनुनासिक** *a.* [अनुगतो नासिकाम्] 1 Nasal, pronounced through the nose; मुखसहितनासिकया उच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् Sk.; मुखनासिकावचनोऽनुनासिकः P. I. 1. 8; अमोऽनुनासिका न ह्रौ Śikṣā; अनुनासिक being a name for the 5 nasal consonants, the vowels or the consonants य्, व्, ल् (under certain circumstances); *i. e.* the letters included in the प्रत्याहार अम् except ह् and र्. -2 The sign used to mark the nasalization in the case of य्, व् or ल्. **-कम्** The nasal twang. **-Comp. -आदिः** a conjunct consonant beginning with a nasal.

**अनुनिर्देशः** Description or relation following the previous order or sequence; भूयसामुपदिष्टानां क्रियाणामथ कर्मणाम्। क्रमशो योऽनुनिर्देशो यथासङ्ख्यं तदुच्यते S. D.

**अनुनिर्वापः** Subsequent libation (with clarified butter).

**अनुनिर्वाप्या** A ceremony connected with this libation

**अनुनिशीथम्** *ind.* At midnight; Ki.

**अनुनी** 1 P. 1 To conciliate, win over, induce, persuade, prevail upon; request, supplicate, entreat, propitiate, pacify, appease (anger &c.); स चानुनीतः प्रणतेन पश्चात् R. 5. 54; विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे 19. 38, 43; Bk. 5. 46; 6. 137; त्वत्सङ्गमेन मम तत्तदिवानुनीतम् V. 3. 20 pacified, made favourable or agreeable; Ki. 13. 67; M. 5; K. 168, 178; Dk. 3, 4, 7. -2 To cherish love; विद्विषोऽप्यनुनय Bh. 2. 77; cf. Shakespeare "Cherish those hearts that hate thee". -3 To bring near to (with dat. of peason). -4 To train, discipline. -5 To honour.

**अनुनय** *a.* [नी-अच्] Kind, conciliatory, pacifying (as words). तुल्यदुःखोऽब्रवीद्भ्राता लक्ष्मणोऽनुनयं वचः Rām. 4. 27. 33. **-यः** 1 Conciliation, propitiation, pacification (of anger), friendly persuasion; कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् R. 2. 54; कथं वा तेषामनुनयः कृतः H. 4; प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति Ś. 4. -2 Courtesy, civility, courteous or polite behaviour, modesty, modest or respectful deportment, conciliatory act (such as salutation); showing respect (to a guest, deity &c.); विविधैरनुतप्यन्ते दयितानुनयैर्मनस्विन्यः V. 3. 5; दयितजन° 2. 22; वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम् S. D. 458. -3 An humble supplication or entreaty, a request in general; भद्र प्रियं नः किंतु त्वदभिप्रायापरिज्ञानान्तरितोऽयमस्मदनुनयः Mu. 2; R. 6. 2; निषेधवाक्यालङ्कारजिज्ञासानुनये खलु Ak; °आमन्त्रणम् conciliatory address. -4 Discipline, training, regulation of conduct. **-यम्** *adv.* Fitly, suitably.

**अनुनयिन्** *a.* Courteous, polite, humble, supplicating.

**अनुनीतिः** = अनुनय q. v.; सानुनीतिश्च सीतायै नाक्रुध्यत् Bk. 8. 75 adopting a conciliatory tone; भजते कुपितोऽप्युदारधीरनुनीतिं नतिमात्रकेण सः Śi. 16. 55.

**अनुनायक** *a.* Submissive, humble, supplicating.

**अनुनायिक** *a.* Conciliating; प्रियतमेषु वधूरनुनायिका Śi. 6. 7. **-का** A female character subordinate to the Nāyikā or leading character, such as a friend, nurse, maid-servant &c.; सखी प्रव्रजिता दासी प्रेष्या धात्रेयिका तथा। अन्याश्च शिल्पकारिण्यो विज्ञेया ह्यनुनायिकाः ॥